ಮಾರ್ಚ್/ಏಪ್ರಿಲ್ 2025 ರ ಪರೀಕ್ಷೆ-1

**MARCH/APRIL 2025 EXAMINATION-1**

# A

**CCE RF/RR/PF/PR**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12

[ Total No. of Printed Pages : 12

[ ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 45

[ Total No. of Questions : 45

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S** **Code No. : 16-S**

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ

## Subject : First Language — SANSKRIT

## प्रथमभाषा — संस्कृतम्

**(ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / ಶಾಲಾ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಖಾಸಗಿ ಪುನರಾವರ್ತಿತ ಅಭ್ಯರ್ಥಿ)**

**(Regular Fresh / Regular Repeater / Private Fresh / Private Repeater)**

ದಿನಾಂಕ : 21. 03. 2025 ] [ Date : 21. 03. 2025

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-00 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-15 ರವರೆಗೆ ] [ Time : 10-00 A.M. to 1-15 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

**Cut here/ಇಲ್ಲಿ ಕತ್ತರಿಸಿ** →

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ***ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ (ಬಾಣದ ಗುರುತನ್ನು ಅನುಸರಿಸಿ), ಎಡಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಬೇಡಿ.*** ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವನ್ನು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.
6. ನಿಮಗೆ ವಿತರಿಸಲಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ( Version ) ಮತ್ತು ನಿಮ್ಮ ಪ್ರವೇಶ ಪತ್ರದಲ್ಲಿ ಮುದ್ರಿತವಾಗಿರುವ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಆವೃತ್ತಿ ಒಂದೇ ಆಗಿರುವುದನ್ನು ಖಾತರಿಪಡಿಸಿಕೊಳ್ಳಿ.

***परीक्षार्थिनां सामान्यसूचना:***

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । **परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत (बाणचिह्नम् अनुसरत) । प्रश्नपत्रमुद्घाटयितु वामपार्श्वेन मा कर्तयत ।** प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । तत्र पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।
6. भवद्भयः प्रदत्ता प्रश्नपत्रस्य आवृत्तिः ( Version ) तथा भवतां प्रवेशपत्रे मुद्रित–प्रश्नपत्रस्य आवृत्तिः च समाना वा इति पर्यवलोकयत ।

इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**

प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

**Tear here**

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6 × 1 = 6**

1. ‘तनयः’ अस्य समानार्थकपदम् इदं भवति ।

   (A) विनयः (B) सन्तोषः

   (C) सुतः (D) वृक्षः

2. ‘सफलम्’ अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) सुफलम् (B) विफलम्

   (C) भूरिफलम् (D) फलम्

3. ‘राजकुमारः’ अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

   (A) राज्ञी (B) राणी

   (C) राजी (D) राजकुमारी

4. ‘भविष्यति’ अत्र एषः लकारः वर्तते ।

   (A) लृट् लकारः (B) लङ् लकारः

   (C) लिट् लकारः (D) लोट् लकारः

5. 'आत्मानम्' अत्र एषा विभक्तिः वर्तते ।

(A) सप्तमीविभक्तिः (B) द्वितीयाविभक्तिः

(C) पञ्चमीविभक्तिः (D) प्रथमाविभक्तिः

6. धर्मः नरस्य वृत्तं जानाति । अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कति (B) कथम्

(C) कस्य (D) कुत्र

**II. चतुर्थं पदं लिखत ।** **4 × 1 = 4**

7. कीर्तिकायः – शिवाजिप्रभुः :: अभयदायिनी – .................... ।

8. शचीपतिः – इन्द्रः :: अञ्जनापतिः – .................... ।

9. अर्जुनः – धीरोदात्तः :: दुर्योधनः – .................... ।

10. गणपतिः – मुनिः :: रमणः – .................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **7 × 1 = 7**

11. इन्द्रः कस्य तपोवनं वव्राज ?

12. सर्वेऽपि जीवराशिः कस्मात् बलं प्राप्नोति ?

13. पुरुषेण यत्नैः कः साध्यः ?

14. काः समुद्रे अस्तं गच्छन्ति ?

15. लोकः केन ग्रथितः ?

16. आहारार्थं किं कुर्यात् ?

17. रमणमहर्षेः कस्मिन् विषये अनास्था आसीत् ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **4 × 2 = 8**

18. पादपजातयः काः ? तासां जन्म कथं भवति ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. भीष्मेण दैवपुरुषकारयोः विषये किमुक्तम् ?

**अथवा**

आतोद्यं कति विधम् ? तानि कानि ?

21. भगवतः दर्शनेन पुलकितः ध्रुवः किम् अकरोत् ? सन्तुष्टः भगवान् विष्णुः किम् अकरोत् ?

**V. सूचनानुसारम् उत्तरं लिखत ।** **4 × 2 = 8**

22. सन्धिं विभज्य नाम लिखत ।

a) मुनिरिति ।

b) यस्योभयम् ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) यथाशक्ति ।

b) विषकण्ठः ।

**अथवा**

समासं कृत्वा समासनाम लिखत ।

a) फाले चन्द्रः यस्य सः =

b) दिनं दिनं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) रामः श्लोकार्थं ज्ञातवान् ।

b) बालकेन पाठः पठनीयः ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकाः क्रीडन्ति ।

b) त्वया किं खाद्यते ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

26. ಜನರು ಪ್ರತಿವರ್ಷ ದಸರಾ ಹಬ್ಬವನ್ನು ಆಚರಿಸುತ್ತಾರೆ. ಆಗ ಭಕ್ತರು ದೇವಾಲಯಕ್ಕೆ ಹೋಗುತ್ತಾರೆ.

People celebrate Dussehra festival every year. Then devotees go to temple.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

27. नगरे सुन्दरम् उपवनम् अस्ति । तत्र प्रातः तथा सायङ्काले नगरवासिनः विहरन्ति ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4 × 3 = 12**

28. सः महर्षिः धर्मात्मा उदारश्च ।

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

29. ''संस्कृतेनैव संस्कृतिरपि सुरक्षिता ।''

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

30. शरणागतरक्षणं धर्मः इति अस्माकं श्रद्धा ।

कः पाठः ? का अवदत् ? शरणागतः कः ?

**अथवा**

मया भोजो रक्षितः ।

कः पाठः ? कः वदति ? कं वदति ?

31. अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।

कः पाठः ? कः वरं ददाति ? कस्मै वरं ददाति ?

**IX. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

32. भासः ।

33. वेदव्यासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3 × 3 = 9**

34. यस्तु सर्वाणि भूतानि

आत्मन्येवानुपश्यति ।

सर्वभूतेषु चात्मानं

ततो न विजुगुप्सते ।।

35. चित्तशान्तिदायिनी विरक्तिबुद्धिवर्धिनी

भेदभावनाशिनी जनेषु चैक्यकारिणी ।

दुःखशोककहारिणी भवाम्बुधेश्च तारिणी

भारतीयभावना विवृद्धिमेतु भारते ।।

36. शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना ।

फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा ।।

**अथवा**

शृङ्गारहास्यकरुणाः

रौद्रवीरभयानकाः ।

बीभत्साद्भुतशान्ताश्च

नव नाट्ये रसाः स्मृताः ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** 1 × 3 = 3

37. श्रीरामः समुद्रः इव गम्भीरः ।

**अथवा**

माघे मेघे गतं वयः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत।** **1 × 3 = 3**

38. पुराणमित्येव न साधु सर्वम् ।

**XIII. पद्यं पूरयत।** **1 × 4 = 4**

39. क्षारं ........................................................................

........................................................................ ।

........................................................................

........................................................................ समुद्गिरन्ति ॥

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।**

**3 × 4 = 12**

40. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते ?

41. पाठ्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

**अथवा**

भीष्मयुधिष्ठिरयोः संवादं पद्यानुगुणं सङ्गृह्य लिखत ।

42. अमरनाथगुहा विषये का पुराणकथा अस्ति ?

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 4 = 4**
**( 2 + 2 )**

43. इन्दुः रात्रौ उदेति । इन्दोः प्रकाशः चन्द्रिका । सा शीतला आह्लादकरी च वर्तते । सूर्यस्य प्रकाशः स्वकीयः । चन्द्रस्य प्रकाशः परकीयः । अयं सूर्यात् प्रकाशं लभते । अतः शीतलः । चन्द्रः भूमिं परितः प्रदक्षिणं करोति । एकेन मासेन एतत्पूर्णं भवति । पूर्णिमायां चन्द्रस्य बिम्बं पूर्णतया दृश्यते । ततः दिने दिने क्षीयते विधुः । तदा कृष्णपक्षः भवति । चन्द्रस्य षोडशकलाः सन्ति । तस्य कलामेकां ईश्वरः वहति । अतः सः चन्द्रशेखरः इति प्रसिद्धः ।

**प्रश्नाः**

i) इन्दुः कदा उदेति ?

ii) कस्य प्रकाशः स्वकीयः ?

iii) चन्द्रस्य बिम्बं कदा पूर्णं भवति ?

iv) ईश्वरः कां वहति ?

**XVI. पत्रं लिखत ।** **1 × 5 = 5**

44. उत्तरकन्नडमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा अग्रजस्य विवाहोत्सवनिमित्तं दिनद्वयं विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति विरामपत्रं लिखत ।

**अथवा**

भवतः/भवत्याः अध्ययनविषये पितरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

45. परिसरसंरक्षणम् ।

**अथवा**

दूरदर्शनम् ।

DO NOT WRITE ANYTHING HERE